९१,१२६, ५९-७०१

॥ ओ३म् ॥

# श्रीरामनाम संकीर्तन

—:o:—

१००० श्रीरामनाम संकीर्तन श्रीमती भक्ताणीदेवी धर्मपत्नि भक्त नन्दकिशोरजी ने निज व्यय से छपवाई।

**मुद्रक तथा प्रकाशक**

भूमानन्द ब्रह्मचारी "भक्ति प्रेस" श्रीभगवद्भक्ति आश्रम, रामपुरा, रेवाड़ी।

प्रथमावृत्ति } १०००

सम्वत् { १९९३

# श्रीरामनामसंकीर्तनम् ।

राम राम जय राजा राम । राम राम जय सीता राम

शुद्धब्रह्मपरात्पर राम । कालात्मकपरमेश्वर राम

शेषतल्पसुखनिद्रित राम । ब्रह्माद्यमरप्रार्थित राम

चण्डकिरणकुलमण्डन राम । श्रीमद्दशरथनन्दन राम

कौशल्यासुखवर्द्धन राम । विश्वामित्रप्रियधन राम

घोरताटकाघातक राम । मारीचादिनिपातक राम

कौशिकमखसंरक्षक राम । श्रीमदहल्योद्धारक राम

गौतममुनिसंपूजित राम । सुरमुनिवरगणसंस्तुत राम

नाविकधावितमृदुपद राम । मिथिलापुरजनमोहक राम

विदेहमानसरञ्जक राम । त्र्यम्बककार्मुकभञ्जक राम

॥

सीतार्पितवरमालिक राम । कृतवैवाहिककौतुक राम

भार्गवदर्पविनाशक राम । श्रीमदयोध्यापालक राम

अगणितगुणगणभूषित राम । अवनीतनयाकामित राम

राकाचन्द्रसमानन राम । पितृवाक्याश्रितकानन राम

प्रियगुहविनिवेदितपद राम। तत्क्षालितनिजमृदुपद राम

भरद्वाजमुखानन्दक राम । चित्रकूटाद्रिनिकेतन राम

दशरथसंततचिंतित राम। कैकेयीतनयार्थित राम

विरचितनिजपितृकर्मक राम । भरतार्पितनिजपादुक राम

दण्डकवनजनपावन राम । दुष्टविराधविनाशन राम

शरभंगसुतीक्ष्ण अर्चित राम । अगस्त्यानुग्रहवर्धित राम

गृध्राधिपसंसेवित राम । पंचवटीतटसुस्थित राम

शूर्पणखार्त्तिविधायक राम । खरदूषणमुखसूदक राम

सीताप्रियहरिणानुग राम । मारीचार्तिकृदाशुग राम

विनष्टसीतान्वेषक राम । गृध्राधिपगतिदायक राम

शबरीदत्तफलाशन राम । कबन्धबाहुच्छेदन राम

हनुमत्सेवितनिजपद राम । नतसुग्रीवाभीष्टद राम

गर्वितवालिसंहारक राम । वानरदूतप्रेषक राम

हितकरलक्ष्मणसंयुत राम। कपिवरसंततसंस्मृत राम
तद्गतिविघ्नध्वंसक राम । सीताप्राणाधारक राम
दुष्टदशाननदूषित राम । शिष्टहनूमद्भूषित राम
सीतावेदितकाकावन राम । कृतचूड़ामणिदर्शन राम
रावणनिधनप्रस्थित राम । वानरसैन्यसमावृत राम
शोषितसरिदीशार्थित राम। विभीषणाभयदायक राम
पर्वतसेतुनिबन्धक राम । कुम्भकर्णशिरच्छेदक राम
राक्षससंघविमर्दक राम। अहिमहिरावणचारण राम

संहृतदशमुखरावण राम। विधिभवमुखसुरसंस्तुत राम

खस्थितदशरथवीक्षित राम। सीतादर्शनमोदित राम

अभिषिक्तविभीषणनत राम। पुष्पकयानारोहण राम

भरद्वाजाभिनिषेवण राम। भरतप्राणप्रियकर राम।

साकेतपुरीभूषण राम। सकलस्वीयसमानत राम

रत्नलसत्पीठास्थित राम। पट्टाभिषेकालंकृत राम

पार्थिवकुलसंमानित राम। विभीषणार्पितरंगक राम

कीशकुलानुग्रहकर राम। कपिवरवचनाश्वासित राम

सकलजीवसंरक्षक राम। समस्तलोकाधारक राम

आगतमुनिगणसंस्तुत राम। विश्रुतदशकण्ठोद्भव राम

सीतालिंगननिर्वृत राम। नीतिसुरक्षितजनपद राम

विपिनत्याजितजनकज राम। कारितलवणासुरवध राम

स्वर्गतशम्बुकसंस्तुत राम। स्वतनयकुशलवनन्दित राम

अश्वमेधक्रतुदीक्षित राम। कालावेदितसुरपद राम

आयोध्यकजनमुक्तिद राम। विधिमुखविबुधानन्दक राम

तेजोमयनिजरूपक राम। संसृतिबन्धविमोचक राम

धर्मस्थापनतत्पर राम। भक्तिपरायणमुक्तिद राम

सर्वचराचरपालक राम। सर्वभवामयवारक राम

वैकुण्ठालयसंस्थित राम। नित्यानन्दपदस्थित राम

भयहर मंगल दशरथ राम। जय जय मंगल सीता राम

मंगल कर जय मंगल राम, संगत शुभ विभवोदय राम

आनन्दामृत वर्षक राम। आश्रित वत्सल जय जय राम

रघुपति राघव राजा राम। पतित पावन सीता राम

— —